# vAkyavRittiH

# વાક્યવૃત્તિઃ

## Document Information

Text title : vaakyavritti

File name : vaakyavritti.itx

Category : vedanta, upadesha, shankarAchArya

Location : doc_z_misc_shankara

Author : Adi Shankaracharya

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi Br. Pranipata Chaitanya pranipatachaitanya at yahoo.co.in, David Lyttle dhlyttle at hotmail.com

Latest update : Deceember 15, 1997, July 23, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# વાક્યવૃત્તિઃ

॥ શ્રી ગણેશાય નમઃ ॥

સર્ગસ્થિતિપ્રલયહેતુમચિન્ત્યશક્તિં વિશ્વેશ્વરં વિદિતવિશ્વમનન્તમૂર્તિમ્ ।
નિર્મુક્તબન્ધનમપારસુખામ્બુરાશિં શ્રીવલ્લભં વિમલબોધઘનં નમામિ ॥ ૧॥

યસ્ય પ્રસાદાદહમેવ વિષ્ણુર્મય્યેવ સર્વં પરિકલ્પિતં ચ ।
ઇત્થં વિજાનામિ સદાત્મરૂપં તસ્યાંઘ્રિપદ્મં પ્રણતોઽસ્મિ નિત્યમ્ ॥ ૨॥

તાપત્રયાર્કસંતપ્તઃ કશ્ચિદુદ્વિગ્નમાનસઃ ।
શમાદિસાધનૈર્યુક્તઃ સદ્ગુરું પરિપૃચ્છતિ ॥ ૩॥

અનાયાસેન યેનાસ્માન્મુચ્યેયં ભવબન્ધનાત્ ।
તન્મે સંક્ષિપ્ય ભગવન્કેવલં કૃપયા વદ ॥ ૪॥

ગુરુરુવાચ ।
સાધ્વીતે વચનવ્યક્તિઃ પ્રતિભાતિ વદામિ તે ।
ઇદં તદિતિ વિસ્પષ્ટં સાવધાનમનાઃ શ‍ૃણુ ॥ ૫॥

તત્ત્વમસ્યાદિવાક્યોત્થં યજ્જીવપરમાત્મનોઃ ।
તાદાત્મ્યવિષયં જ્ઞાનં તદિદં મુક્તિસાધનમ્ ॥ ૬॥

શિષ્ય ઉવાચ ।
કો જીવઃ કઃ પરશ્ચાત્મા તાદાત્મ્યં વા કથં તયોઃ ।
તત્ત્વમસ્યાદિવાક્યં વા કથં તત્પ્રતિપાદયેત્ ॥ ૭॥

ગુરુરુવાચ ।
અત્ર બ્રૂમઃ સમાધાનં કોઽન્યો જીવસ્ત્વમેવ હિ ।
યસ્ત્વં પૃચ્છસિ માં કોઽહં બ્રહ્મૈવાસિ ન સંશયઃ ॥ ૮॥

શિષ્ય ઉવાચ ।
પદાર્થમેવ જાનામિ નાદ્યાપિ ભગવન્સ્ફુટમ્ ।

અહં બ્રહ્મેતિ વાક્યાર્થં પ્રતિપદ્યે કથં વદ ॥ ૯॥

ગુરુરુવાચ ।
સત્યમાહ ભવાનત્ર વિગાનં નૈવ વિદ્યતે । var વિજ્ઞાનં
હેતુઃ પદાર્થબોધો હિ વાક્યાર્થાવગતેરિહ ॥ ૧૦॥

અન્તઃકરણતદ્વૃત્તિસાક્ષિચૈતન્યવિગ્રહઃ ।
આનન્દરૂપઃ સત્યઃ સન્કિં નાત્માનં પ્રપદ્યસે ॥ ૧૧॥

સત્યાનન્દસ્વરૂપં ધીસાક્ષિણં બોધવિગ્રહમ્ ।
ચિન્તયાત્મતયા નિત્યં ત્યક્ત્વા દેહાદિગાં ધિયમ્ ॥ ૧૨॥

રૂપાદિમાન્યતઃ પિણ્ડસ્તતો નાત્મા ઘટાદિવત્ ।
વિયદાદિમહાભૂતવિકારત્વાચ્ચ કુમ્ભવત્ ॥ ૧૩॥

અનાત્મા યદિ પિણ્ડોઽયમુક્તહેતુબલાન્મતઃ ।
કરામલકવત્સાક્ષાદાત્માનં પ્રતિપાદય ॥ ૧૪॥

ઘટદ્રષ્ટા ઘટાદ્ભિન્નઃ સર્વથા ન ઘટો યથા ।
દેહદ્રષ્ટા તથા દેહો નાહમિત્યવધારય ॥ ૧૫॥

એવમિન્દ્રિયદૃઙ્નાહમિન્દ્રિયાણીતિ નિશ્ચિનુ ।
મનોબુદ્ધિસ્તથા પ્રાણો નાહમિત્યવધારય ॥ ૧૬॥

સંઘાતોઽપિ તથા નાહમિતિ દૃશ્યવિલક્ષણમ્ ।
દ્રષ્ટારમનુમાનેન નિપુણં સમ્પ્રધારય ॥ ૧૭॥

દેહેન્દ્રિયાદયો ભાવા હાનાદિવ્યાપૃતિક્ષમાઃ ।
યસ્ય સન્નિધિમાત્રેણ સોઽહમિત્યવધારય ॥ ૧૮॥

અનાપન્નવિકારઃ સન્નયસ્કાન્તવદેવ યઃ ।
બુદ્ધ્યાદીંશ્ચાલયેત્પ્રત્યક્ સોઽહમિત્યવધારય ॥ ૧૯॥

અજડાત્મવદાભાન્તિ યત્સાન્નિધ્યાજ્જડા અપિ ।
દેહેન્દ્રિયમનઃપ્રાણાઃ સોઽહમિત્યવધારય ॥ ૨૦॥

અગમન્મે મનોઽન્યત્ર સામ્પ્રતં ચ સ્થિરીકૃતમ્ ।
એવં યો વેત્તિ ધીવૃત્તિં સોઽહમિત્યવધારય ॥ ૨૧॥

સ્વપ્નજાગરિતે સુપ્તિં ભાવાભાવૌ ધિયાં તથા ।
યો વેત્ત્યવિક્રિયઃ સાક્ષાત્સોઽહમિત્યવધારય ॥ ૨૨॥

ઘટાવભાસકો દીપો ઘટાદન્યો યથેષ્યતે ।
દેહાવભાસકો દેહી તથાહં બોધવિગ્રહઃ ॥ ૨૩॥

પુત્રવિત્તાદયો ભાવા યસ્ય શેષતયા પ્રિયાઃ ।
દ્રષ્ટા સર્વપ્રિયતમઃ સોઽહમિત્યવધારય ॥ ૨૪॥

પરપ્રેમાસ્પદતયા મા ન ભૂવમહં સદા ।
ભૂયાસમિતિ યો દ્રષ્ટા સોઽહમિત્યવધારય ॥ ૨૫॥

યઃ સાક્ષિલક્ષણો બોધસ્ત્વંપદાર્થઃ સ ઉચ્યતે ।
સાક્ષિત્વમપિ બોદ્ધૃત્વમવિકારિતયાત્મનઃ ॥ ૨૬॥

દેહેન્દ્રિયમનઃપ્રાણાહઙ્કૃતિભ્યો વિલક્ષણઃ ।
પ્રોજ્ઝિતાશેષષડ્ભાવવિકારસ્ત્વંપદાભિધઃ ॥ ૨૭॥

ત્વમર્થમેવં નિશ્ચિત્ય તદર્થં ચિન્તયેત્પુનઃ ।
અતદ્વ્યાવૃત્તિરૂપેણ સાક્ષાદ્વિધિમુખેન ચ ॥ ૨૮॥

નિરસ્તાશેષસંસારદોષોઽસ્થુલાદિલક્ષણઃ ।
અદૃશ્યત્વાદિગુણકઃ પરાકૃતતમોમલઃ ॥ ૨૯॥

નિરસ્તાતિશયાનન્દઃ સત્યપ્રજ્ઞાનવિગ્રહઃ ।
સત્તાસ્વલક્ષણઃ પૂર્ણ પરમાત્મેતિ ગીયતે ॥ ૩૦॥

સર્વજ્ઞત્વં પરેશત્વં તથા સમ્પૂર્ણશક્તિતા ।
વેદૈઃ સમર્થ્યતે યસ્ય તદ્બ્રહ્મેત્યવધારય ॥ ૩૧॥

યજ્જ્ઞાનાત્સર્વવિજ્ઞાનં શ્રુતિષુ પ્રતિપાદિતમ્ ।
મૃદાદ્યનેકદૃષ્ટાન્તૈસ્તદ્બ્રહ્મેત્યવધારય ॥ ૩૨॥

યદાનન્ત્યં પ્રતિજ્ઞાય શ્રુતિસ્તત્સિદ્ધયે જગૌ ।
તત્કાર્યત્વં પ્રપઞ્ચસ્ય તદ્બ્રહ્મેત્યવધારય ॥ ૩૩॥

વિજિજ્ઞાસ્યતયા યચ્ચ વેદાન્તેષુ મુમુક્ષુભિઃ ।
સમર્થ્યતેઽતિયત્નેન તદ્બ્રહ્મેત્યવધારય ॥ ૩૪॥

જીવાત્મના પ્રવેશશ્ચ નિયન્તૃત્વં ચ તાન્ પ્રતિ ।
શ્રૂયતે યસ્ય વેદેષુ તદ્બ્રહ્મેત્યવધારય ॥ ૩૫॥

કર્મણાં ફલદાતૃત્વં યસ્યૈવ શ્રૂયતે શ્રુતૌ ।

જીવાનાં હેતુકર્તૃત્વં તદ્બ્રહ્મેત્યવધારય ॥ ૩૬॥

તત્ત્વંપદાર્થૌ નિર્ણીતૌ વાક્યાર્થશ્ચિન્ત્યતેઽધુના ।
તાદાત્મ્યમત્ર વાક્યાર્થસ્તયોરેવ પદાર્થયોઃ ॥ ૩૭॥

સંસર્ગો વા વિશિષ્ટો વા વાક્યાર્થો નાત્ર સમ્મતઃ ।
અખણ્ડૈકરસત્વેન વાક્યાર્થો વિદુષાં મતઃ ॥ ૩૮॥

પ્રત્યગ્બોધો ય આભાતિ સોઽદ્વયાનન્દલક્ષણઃ ।
અદ્વયાનન્દરૂપશ્ચ પ્રત્યગ્બોધૈકલક્ષણઃ ॥ ૩૯॥

ઇત્થમન્યોન્યતાદાત્મ્યપ્રતિપત્તિર્યદા ભવેત્ ।
અબ્રહ્મત્વં ત્વમર્થસ્ય વ્યાવર્તેત તદૈવ હિ ॥ ૪૦॥

તદર્થસ્ય પારોક્ષ્યં યદ્યેવં કિં તતઃ શ્રુણુ ।
પૂર્ણાનન્દૈકરૂપેણ પ્રત્યગ્બોધોવતિષ્ઠતે ॥ ૪૧॥

તત્ત્વમસ્યાદિવાક્યં ચ તાદાત્મ્યપ્રતિપાદને ।
લક્ષ્યૌ તત્ત્વંપદાર્થૌ દ્વાવુપાદાય પ્રવર્તતે ॥ ૪૨॥

હિત્વા દ્વૌ શબલૌ વાચ્યૌ વાક્યં વાક્યાર્થબોધને ।
યથા પ્રવર્તતેઽસ્માભિસ્તથા વ્યાખ્યાતમાદરાત્ ॥ ૪૩॥

આલમ્બનતયાભાતિ યોઽસ્મત્પ્રત્યયશબ્દયોઃ ।
અન્તઃકરણસંભિન્નબોધઃ સ ત્વંપદાભિધઃ ॥ ૪૪॥

માયોપાધિર્જગદ્યોનિઃ સર્વજ્ઞત્વાદિલક્ષણઃ ।
પરોક્ષ્યશબલઃ સત્યાદ્યાત્મકસ્તત્પદાભિધઃ ॥ ૪૫॥

પ્રત્યક્પરોક્ષતૈકસ્ય સદ્વિતીયત્વપૂર્ણતા ।
વિરુધ્યતે યતસ્તસ્માલ્લક્ષણા સમ્પ્રવર્તતે ॥ ૪૬॥

માનાન્તરવિરોધે તુ મુખ્યાર્થસ્ય પરિગ્રહે ।
મુખ્યાર્થેનાવિનાભૂતે પ્રતીતિર્લક્ષણોચ્યતે ॥ ૪૭॥

તત્ત્વમસ્યાદિવાક્યેષુ લક્ષણા ભાગલક્ષણા ।
સોઽયમિત્યાદિવાક્યસ્થપદયોરિવ નાપરા ॥ ૪૮॥

અહં બ્રહ્મેતિવાક્યાર્થબોધો યાવદ્દૃઢીભવેત્ ।
શમાદિસહિતસ્તાવદભ્યસેચ્છ્રવણાદિકમ્ ॥ ૪૯॥

શ્રુત્યાચાર્યપ્રસાદેન દૃઢો બોધો યદા ભવેત્ ।
નિરસ્તાશેષસંસારનિદાનઃ પુરુષસ્તદા ॥ ૫૦॥

વિશીર્ણકાર્યકરણો ભૂતસૂક્ષ્મૈરનાવૃતઃ ।
વિમુક્તકર્મનિગડઃ સદ્ય એવ વિમુચ્યતે ॥ ૫૧॥

પ્રારબ્ધકર્મવેગેન જીવન્મુક્તો યદા ભવેત્ ।
કિઞ્ચિત્કાલમનારબ્ધકર્મબન્ધસ્ય સંક્ષયે ॥ ૫૨॥

નિરસ્તાતિશયાનન્દં વૈષ્ણવં પરમં પદમ્ ।
પુનરાવૃત્તિરહિતં કૈવલ્યં પ્રતિપદ્યતે ॥ ૫૩॥

॥ ઇતિ પરમહંસપરિવ્રાજકાચાર્યશ્રીમચ્છઙ્કરાચાર્યવિરચિતા
વાક્યવૃત્તિઃ સમાપ્ત ॥

Encoded and proofread by Sunder Hattangadi
Proofread by Br. Pranipata Chaitanya, David Lyttle

*vAkyavRittiH*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*